This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पा.स.ल.उ.रा.

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
M-2540	रामायणविजय	-	~~नैषिक~~ ईश्वर	पुर्ण	-	1/8	10	संस्कृत	कागद	13	34		

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ अथवश्यं प्रवक्ष्यामियंत्रतंत्रपुरःसरं॥ बिंदुत्रिकोणषट्कोण
मष्टपत्रंततोबहिः॥ १॥ अष्टकोणंतुतत्बाह्ये भूपूरेणैववेष्टयेत्॥ बिंदुमध्येत्रिकोणंतु
देवबीजंत्रिकोणके॥ २॥ मंत्राक्षराणिषट्कोणेअष्टपत्रेजनावधि॥ स्वाहांतमष्टकोणेतुभू
पुरेसाध्यनामकं॥ ३॥ मंत्राक्षराणिसर्वाणिकामबीजांरेन्यसेत्॥ अष्टपत्रेष्टकोणच
विद्यामंत्रंसतारकं॥ ४॥ एवंलिखित्वाविधिवत्प्राणस्थापनमाचरेत्॥ स्तूपुष्पैःस
मभ्यर्च्यसप्तरात्रंप्रपूजयेत्॥ ५॥ पायसान्नैरपूपैश्चकदलीफलमोदकैः॥ तांबूलेश्च
निवेद्याथजपेत्पंचसहस्रकं॥ ६॥ धारयेद्दक्षिणेहस्तेयंत्रमेतदनुत्तमं॥ राजावातदमा
त्योवायेचान्येपुप[illegible]जीविनः॥ ७॥ नरानार्यश्चयेविविधामृगपक्षिणणास्तथा॥ सर्व
तस्यवशंयांतिसप्तरात्रात्स्वरुग्धवत्॥ ८॥ अथवाबिल्वरेवत्यंत्रंकुंकुमान्वितचंदने॥ स
कर्पूरेमदयुतेलिखित्वामंत्रमुत्तमं॥ ९॥ साध्यनामसमायुक्तंप्राणसंस्थापनंतथा॥ सं
पूज्यचगणाधीशंजपेदष्टसहस्रकं॥ १०॥ तच्चंदनंगृहीत्वातुनिजदेहविलेपयेत्॥ तदर्श
नात्तदाघ्रानुदास्यंतिप्राणमप्यहो॥ ११॥ नरनार्यश्चविवशामदनालसमानसः॥ स
द्यस्तस्यवशंयांतिनात्रकार्याविचारणात्॥ १२॥ शालिपिष्टसमानीयघृतशर्कयान्वितं॥

कूट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा० ग० यं० २

साध्यरूपांकृतं कृत्वा स्मृतं मंदाग्निनापुनः॥१३॥ गृहीत्वा मंत्रमालिख्य साध्यनामपुरः सरं॥ जपेदष्टसहस्रं तु जपांते भक्षयेत्स्वयं॥१४॥ सतस्यवशमायाति मरणांतं न संशयः॥ हैमेवाराजते ताम्रे वश्ययंत्रं समालिखेत्॥१५॥ संपूज्य धारयेद्यस्तु त्रैलोक्यं तद्वशं भवेत्॥ अन्येषुभक्ष्यभोज्येषु वश्ययंत्रं समालिखेत्॥१६॥ अष्टोत्तरशतं जप्त्वा प्राशयेत्साध्यपूर्वकं॥ तत्क्षणात्स्ववशं यांति यावद्दृष्टोत्र विद्यते॥१७॥ भस्मितं यंत्रितं ब्रह्मन्यंत्रैस्समन्वितं॥ धृत्वा गच्छेत्सभामध्ये सभा तस्य वशा भवेत्॥१८॥ यत्स्मृत्वा च जपेन्मंत्रं तत्सिद्धिं च तत्क्षणात्॥ अथाकर्षणकर्माणि विचित्राणि वदामि ते॥१९॥ पूर्ववत्यंत्रमालिख्य साध्यनामसमन्वितं॥ बीजाक्षराणि सर्वाणि माया बीजांतराणि च॥ लिखेत्॥२०॥ मंत्रांते विलिखेत्ब्रह्मन्साध्यमाकर्षयेति च॥ पूर्ववत्प्रजपेन्मंत्रं सप्ताहं विधिपूर्वकं॥२१॥ रक्तपुष्पैस्समभ्यर्च्य सिद्धान्नं तु निवेदयेत्॥ सुशालितंडुलप्रस्थं तद्धर्मसुद्भिन्नकं॥२२॥ चतुःपलं गुडं प्रोक्तं तन्मानं नारिकेरकं॥ मुष्टिमात्रं मरीचं स्यात्तद्धर्मसैंधवरजः॥२३॥ तद्धर्मजीरकं विद्यात्कुंडपैंगो घृतं विदुः॥ गोक्षीरेण स्यमात्रेण संयोज्य कमलासन॥२४॥ मंदाग्निनापचेद्वांसिद्धान्नमिमुत्तमं॥ अमृतेन समंसाक्षाद्विघ्नेशस्य प्रियावहं॥२५॥ सिद्धोद

कुंडवा धर्मघृतं तथा

म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेनसंपूज्यसर्वकर्माणिकारयेत्॥साध्यस[illegible]द्यःसमायातिसाध्यवान्नात्रसंशयः
॥२६॥एतत्यंत्रसमालिख्यभूर्जपत्रेविशेषतः॥मधुकल्कंसमानीयकुर्यात्साध्याकृति
शिवां॥२७॥यंत्रंसंपूज्यजप्तातुतल्कुक्षौसन्निवेशयेत्॥एवंउदंडेनिक्षिप्यदीपेरूपंप्रतापयेत्॥
२८॥तापयित्वाजपेन्मंत्रंसाध्यनामसमन्वितं॥शीघ्रमायातियुवतिमदनाकुलमानसः॥२९
॥वामपादरजोगृह्यतस्मिन्यंत्रसमालिखेत्॥साध्यनामसमायुक्तंजपेदष्टसहस्रकं॥३०॥स
द्यःसाध्यःसमायातिसंदेहोनात्रविद्यते॥विघ्नेश्वरंसमासाद्यसंपूज्यविधिपूर्वकं॥३१॥
साध्यःस्मृत्वाजपेत्ब्रह्मन्समायातिनसंशयः॥इतिकुमारसंहितायांवश्यादिप्रयोगः
॥पंचमः॥अथातःसंप्रवक्ष्यामिस्तंभनंपद्मसंभव॥पूर्ववत्यंत्रंविलिख्यबीजमंत्रपुरः
रं॥१॥मंत्राक्षराणिविलिखेत्धरणीबीजमध्यतः॥प्राणसंस्थापनंकृत्वासाध्यनामस
मन्वितं॥२॥पूजयेत्सप्तरात्रंतुपीत्तपुष्पैर्विशेषतः॥आयसेताम्रपत्रेवाभूर्जपत्रेसमालि
खेत्॥३॥अर्धरात्रंजपेन्नित्यंअष्टोत्तरसहस्रकं॥रणभूमौखनेत्तत्यंत्रंबलिंदत्वाविशे
षतः॥४॥सेनास्तंभनमायातिचतुरंगबलान्वितं॥नगरेनगरांतस्थान्सभामध्येस
भासदः॥५॥क्षेत्रेषुशलभादींश्चमार्गेचोरमृगानपि॥स्तंभयेत्सकलानत्रनात्रेकार्याविचारणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६॥भूमिसंस्पर्शनात्पूर्वं गृहीत्वानडुहंसकृत्॥पीडाकांततोदग्धा भौमवारेविशेषतः॥७॥
यंत्रंभस्मानिसंलिख्यसाध्यनामसमान्वितं॥प्राणप्रतिष्ठांकृत्वातुपीतपुष्पैःसमर्चयेत्॥८॥नि
क्षिपेत्मूर्ध्नितद्भस्मसद्यःस्तंभोनसंशयः॥धृत्वागच्छेत्सभामध्येसभावाकस्तंभनंभवेत्॥९॥ता
डपत्रेसमालिख्यस्तंभयंत्रसमन्वितं॥प्राणप्रतिष्ठांकृत्वातुपीतपुष्पैःसमर्चयेत्॥१०॥कुंकुमे
नसमालिख्यजपेदष्टसहस्रकं॥सिरवायांधारयेत्यंत्रंलोकस्तंभोनसंशयः॥११॥गजयुद्धेम
बयुद्धेनरयुद्धेपरस्परं॥यंत्रधारणमात्रेणस्तंभनंप्रतियोगिनः॥१२॥बहुनात्रकिमुक्तेनरह
स्यंशृणुपद्मज॥आनयेतिपदस्थानेस्तंभयेतिपददयं॥१३॥साध्यनामसमायुक्तेजपस्तंभनि
कर्मणि॥केवलंजपमात्रेणस्तंभयेन्नात्रसंशयः॥१४॥शृणुब्रह्मन्प्रवक्ष्यामिशत्रोरुच्चाटणंप
रं॥पूर्ववत्यंत्रमालिख्यसम्यगायसपट्टके॥१५॥मंत्राक्षराणिसंवर्णिवायुबीजेनवेष्टयेत्॥
प्राणसंस्थापनंकृत्वाकृष्णपत्रैःसमर्चयेत्॥१६॥संपूज्यनवरात्रंतुनित्यमष्टसहस्रकं॥जीर्ण
वस्त्राणिसंगृह्यतृणावर्तेस्थितानिच॥१७॥स्मशानान्नीलिरवोमूलंरथावर्तस्यमूलकं॥करवा
रस्यपत्राणिसर्वंवैस्थिरवाससे॥१८॥कालिकोदयवेलायांदुर्गातैलौलयेद्दृढं॥तद्भस्मकृष्णव
स्त्रेणगृह्णीयात्यंत्रपूर्वकं॥१९॥बिभीतकलचाबध्यशत्रुदेहेविनिक्षिपेत्॥शत्रुस्वबंधुभिःसा

नीलिका
काल्यागृहे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्धदेशात्देशांतरंव्रजेत्॥२०॥यत्रकुत्रापिसंस्थाप्यत्तत्तदुच्चाटणंक्षणात्॥उच्चाट्यपदंप्रोक्तंकेवलं
जपमात्रतः॥२१॥उच्चाटणंभवेत्सद्यःशत्रूणांनात्रसंशयः॥२२॥इतिकुमारसंहितायांस्तंभनोच्चा
टणंनामषष्ठोध्यायः॥ सर्वलोकोपकारार्थंप्रवक्ष्येकमलासनं॥विशेषेणनृपाणांसर्वसाराज्य
दायकं॥१॥यंत्रंतंत्रंविनासद्यःसर्वकर्माणिसाधितं॥ होमंप्रवक्ष्यामिदेवैश्चस्यविघ्नगणपतेर्वि
भोः॥२॥विधायहोमंकुंडंतुचतुरस्रंत्रिमेखलं॥अरत्निमात्रंद्विगुणंकुर्यात्कर्मानुरूपतः॥३॥
स्वार्थेह्यरत्निमात्रंस्यात्परार्थेद्विगुणंभवेत्॥देवालयेपरार्थेचस्वार्थेचानिजपेश्मनि॥
॥४॥कुंडेवह्निंसमाधायसमुद्यांपरिषिंच्यते॥कुर्यादाग्नेयमुखंब्रह्मन्कर्तुःसूत्रानुसारतः
॥५॥आचार्यसूत्रेणैवापिकूर्यादग्निमुखंक्रियां॥कुंडेसिंहासनंध्यात्वाकुर्यात्पिंडार्चनंक्र
मात्॥६॥पूर्वोक्तमार्गेणाभ्यर्चंध्यात्वाविघ्नगणेश्वरं॥गणानांत्वेत्यृचावाद्यमूलमंत्रेणचा
परं॥७॥अर्घ्यपाद्यादिकंदत्वागंधपुष्पैःसमर्चयेत्॥दत्वाधूपंचदीपंचनारीकेलंतथाप्
येत्॥८॥पायसापूपकादलीफलादीनिवेदयेत्॥अष्टोत्तरशतंब्रह्मन्कुर्याद्राज्याहुतीस्सु
धीः॥९॥षोडशंनारिकेलायांद्विगुणंकदलीफलं॥शर्कराखाजपृथुकमोदकैर्मधुसर्पिषा
॥१०॥अष्टद्रव्याणिसंयोज्यहुनेदक्षरसंख्यया॥अक्षराणांतुहोमयेन्मंडलंसुधीः॥११॥न

च

वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वारणपूजांचकृत्वाभक्तिपुरःसरं॥सर्वान्कामान्अवाप्नोतिविघ्नेशःसुप्रसीदति॥१२॥
पुत्रार्थीलभतेपूत्रान्धनार्थीधनसंपदः॥निगडाश्चविमुच्येतमहारोगाच्चरोगिणः
॥१३॥ यद्यत्संप्रार्थ्यजुहुयात्तत्तदाप्नोतितत्क्षणात्॥संदेहोत्रनकर्तव्यःसत्यमेववदा
म्यहं॥१४॥पयैस्तुदशसाहस्त्रैहोमंद्व[illegible]भूनरः॥जातिपुष्पैर्यजेद्विद्वान्राजावश्यन्नस
शयः॥१५॥कुटजैश्चयंपकैर्हुत्वामहदैश्वर्यमाप्नुयात्॥करवीरस्यपुष्पैस्तुजुहुयाच्छत्रु
नाशनं॥१६॥रक्तपुष्पैर्यजेत्ब्रह्मन्क्षौमवस्त्रादिलब्धये॥कृतमालकपुष्पेणभूषणा
दिचलभ्यते॥१७॥जपाकुसुमहोमेनविघ्नेशःसुप्रसीदति॥कोशेयपुष्पैर्हुत्वातुयोग
सिद्धिमवाप्नुयात्॥१८॥पीत~~कसीदतिकोशेय~~पुष्पैर्हुनेन्नित्यंवैरिवाक्स्तंभनंभवेत्॥
अर्कस्यपुष्पैर्होमेनवैरिकास्तंभनंभवेत्॥१९॥उन्मत्तपुष्पहोमेनस्वशत्रोरुन्मादकारणं॥
होमोल्लाजैस्त्रिमध्वक्तैःसर्वस्वयकरोभवेत्॥२०॥कल्हारोत्पलहोमेनराजस्त्रीवशगाभ
वेत्॥तैलयुक्तंनिशाचूर्णंहोमेनस्तंभयेत्क्षणात्॥२१॥दूर्वायुग्मंहुनेत्सद्यःसर्वरोगवि
नाशनं॥गुडूच्ययुतहोमेनमृतोवापिसजीवति॥२२॥आज्यमिश्रातिलैर्हुत्वामृत्युनाशो
नसंशयः॥घरमान्नेनजुहुयादष्टोत्तरशताहुतिः॥२३॥मंडलेनभवेन्नूनंपशूधान्यसंप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्धिमान्॥विघ्नेश होमंकृत्वातुपश्चात्सर्वंसमाचरेत्॥२४॥विनाविघ्नेशहोमन्नकर्मतं
निष्फलंभवेत्॥इतिकुमारसंहितायांहोमविधिः॥ भूपतीनांहितार्थायहोमंवक्ष्यामिप
द्मज॥१॥केवलंहोममात्रेणसद्यःसाम्राज्यदायकं॥गजवृद्धिकरंश्रीमदश्ववृद्धिकरंपर
॥२॥प्रजावृद्धिकरंचैवराज्यवृद्धिकरंपरं॥एतत्सर्वंभवेद्ब्रह्मन्नित्यहोमान्नसंशयः॥
३॥नित्यहोमंप्रवक्ष्यामियथावत्कर्मलाघवं॥अरत्निद्व्यंमात्रेतुकुंडेसंस्थाप्यपावकं॥४॥
कुंडस्योत्तरभागेतुकुंभमेकंविनिक्षिपेत्॥५॥विघ्नेशंप्रतिमांकुर्यात्द्वात्रिंशानिष्कसं
ख्यया॥घ्राणसंस्थापनंकृत्वाकलशेस्थापयेद्विभुं॥५॥गंधपुष्पैःसमभ्यर्च्य धूपदीपंप्रक
ल्पयेत्॥नैवेद्यंविधिवद्दत्वापायसापूपमोदकैः॥६॥ तांबूलंविनिवेद्याथततोहोमंसमा
चरेत्॥वैदिग्निमुखंकृत्वापीठपूजांविधायच॥७॥आवाह्यचगणाधीशंदत्वाचार्घ्यादि
कंतथा॥संपूर्णविद्यागणपंनवावरणपूर्वकं॥८॥आज्याहुतिंततःकुर्याच्छत्तमशेत्तरंतुवा
॥आचार्यंत्वथहोमांतेकृत्वातुविधिपूर्वकं॥९॥सहर्त्विग्भिश्चतुर्भिश्चहोमकर्मसमाच
रेत्॥अष्टद्रव्येणनेत्रब्रह्मन्नअशेत्तरसहस्रकं॥१०॥पश्चादाज्याहुतिंकुर्यादाचार्यःपूर्ववत्
स्वयं॥अशेत्तरंसमाराध्यनवावरणपूर्वकं॥११॥प्रसन्नपूजांसंकल्प्यपायसापूपमोदकैः

का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२॥पानीयैःपानकाद्यैश्चविघ्नराजंप्रपूजयेत्॥ततःपुष्पांजलिंकृत्वापंचमुद्रांप्रदर्शयेत्
॥१३॥स्तोत्रैस्तुत्वागणाधीशंध्यात्वाचिंन्मयमव्ययं॥वामनासापुटेनैवहृत्पद्मेयोजयेत्व
भुं॥१४॥पुष्पैरात्मानमभ्यर्च्ययथाशक्तिजपेन्मनुं॥यजमानस्तुहोमांतेविनयेनममाहृतः
॥१५॥विघ्नेश्वरंहोमकुंडमाचार्यंसार्त्विजंतथा॥सम्यक्प्रदक्षिणीकृत्यदद्यादाचार्यदक्षिणां
॥१६॥ऋत्विजांतुतथादद्याद्दक्षिणांभक्तिसंयुतः॥आचार्यंद्विगुणंसार्त्विग्भिश्चसमंसमं॥१७
॥ब्राह्मणान्भोजयेन्नित्यंसमभ्यर्च्यदिवेदिवे॥एवंमंडलंहोमेनसर्वकार्यार्थसिद्धिदः॥१८॥आयु
र्वृद्धिकरंसाक्षादपमृत्युविनाशनं॥पूर्वोक्तंसर्वकार्याणिसफलानिनसंशयः॥१९॥संग्रामवि
जयेप्राप्तेसमाराध्यगणेश्वरं॥होमशालांप्रकुर्वीतचतुष्षष्टिपदायुतं॥२०॥चतुरस्रांसमाचै
वचतुर्द्वारसमान्वितं॥वितानतोरणोद्भाजत्कदलीतोरणान्वितं॥२१॥तन्मध्येहोमकुंडं
तुद्विगुणंनित्यकुंडतः॥२२॥मेखलात्रयसंयुक्तंचतुरस्रंसमंततः॥कुंडस्योत्तरभागेतु
स्थापयेत्पंचकुंभकान्॥२३॥विघ्नेशःप्रतिमांकुर्याद्द्विगुणांनित्यहोमतः॥प्राणसंस्थापनंकृत्वा
कुंभमध्येविनिक्षिपेत्॥२४॥अर्चयेगंधपुष्पाद्यैःधूपैर्दीपैःप्रपूजयेत्॥नैवेद्यंविधिवत्कृत्वाहो
मकर्मसमाचरेत्॥२५॥आचार्यस्तुशुचिर्भूत्वाक्षौमवस्त्रोत्तरीयकं॥कूर्मासनंसमाधायकुर्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यासंजपादिकं॥२६॥ कुंडेवान्हिंप्रतिष्ठाप्य कुर्यादग्निमुखंक्रमात्॥आगमाग्निमुखंकृत्वा
ततोवैमूलविद्यया॥२७॥ अष्टोत्तरसहस्रंतु कुर्यादाज्याहुतिंविधे॥ ग्रहान्ग्रपूजयेन्नित्यम
मष्टोत्तरंशतं॥सहस्रैर्घृतमिश्रैश्च पायसान्नैरथापिवा॥हुतिंहुनेत्॥२८॥ नित्यंषोडशसाहस्रंहोम
मेवंविधिपूर्वकं॥प्रत्येकंतुजपंकुर्यात्नित्य मष्टोत्तरंशतं॥२९॥ कुंभस्यपश्चिमेभागेस्थंडि
लेमंडितेविधे॥ग्रहान्ग्रपूजयेनित्यंमष्टोत्तरशतंशतं॥३०॥ ग्रहाग्रन्ग्रपूजयेन्नित्यमष्टोत्त
रंशतं॥ ग्रपूजयेन्नित्यमादित्यादियथाक्रमं॥३१॥पायसान्नैरथापूपैश्चाविघ्नेशायनिवेद
येत्॥३१॥अष्टोत्तरसहस्रंतुरात्रौकुर्याततर्पणं॥३२॥ ऋत्विक्भिर्जपियेन्मंत्रमष्टोत्तरसह
स्रकं॥३२॥बिभीतकुसमिद्भिश्चहोमयदयुतत्रयं॥एवंमंडलहोमेननूनंशत्रूपलायनं॥
॥३३॥विघ्नेश्वरप्रसादेनशत्रुसेनाविनश्यति॥ब्राह्मणान्भोजयेन्नित्यंविघ्नेशमभिपूजयेत्
॥३४॥ होमान्तेदक्षिणांदद्यात्गंधपुष्पैःसमन्वितां॥आचार्यायशतंनिष्कान्ऋत्विग्भ्यःषो
डशक्रमात्॥३५॥उक्तसंग्रामविजयंसद्यःसाम्राज्यदायकं॥सर्वैश्वर्यप्रदंदिव्यंसर्वशत्रु
उपलायनं॥३६॥ कर्तव्यंभूमिपालेनशत्रुसंहारमिच्छता॥धर्मार्थिकाममोक्षाणांसाधनंलोक
रंजनं॥३७॥आयुष्करंव्याधिहरंसर्वशत्रूनिवारणं॥विघ्नागणेशमाहात्म्यंश्रोतृणां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग० ६० ज्ञतामपि ॥३८॥ इतिकौमारसंहितायांविद्यागणपतिकल्पेरहस्याम्बि गमेसंग्रामर्वि
जयोध्यायः॥ श्रीगजाननार्पणमस्तु॥ शुभंभवतु॥ ॥ध॥ ॥ध॥२
वा०रा०क० असे० ॥ध॥ ॥ध॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=14.01.20 14:19
,TRANSFERRED=2020/01/14 at 14:22:34
,PAGES=11
,TYPE=STD
,NAME=S0002514
,Book Name=M-2540-SANGRAM VIJAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE11=00000011.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection